# ashmakagItA from Bharatamanjari of Kshemendra

# અશ્મકગીતા ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતા

## Document Information

Text title : ashmakagItA from Bharatamanjari of Kshemendra

File name : ashmakagItABM.itx

Category : giitaa, kShemendra

Location : doc_giitaa

Author : Kshemendra

Description/comments : kAvyamAlA 65. Bharatamanjari

Latest update : October 15, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 15, 2022

*sanskritdocuments.org*

# અશ્મકગીતા ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતા

તસ્માત્પાલય ભૂપાલ ક્ષત્રધર્મે સ્થિતઃ પ્રજાઃ ।
ક્ષયં કાલકૃતં વીક્ષ્ય મા ચ શોકે મનઃ કૃથાઃ ॥ ૧૩.૧૦૭॥

ભૂત્વા ભૂત્વા પ્રલીયન્તે કાલેન કલિતાઃ કિલ ।
લોકાઃ કાલકલાજલૈશ્ચિત્રશ્ચાયં ભવશ્રમઃ ॥ ૧૩.૧૦૮॥

ઉક્તં સેનજિતા રાજ્ઞા પુરા રાજન્વિવેકિના ।
દુઃખે દૃઢં મનઃ કુર્યાન્નર્તિશોકગદૌષધમ્ ॥ ૧૩.૧૦૯॥

શોચતાં ધૃતિહીનાનાં ન શાન્તિર્જાયતે ક્વચિત્ ।
દુઃખૈરાયાન્તિ દુઃખાનિ ધનાનીવ ધનૈર્નૃણામ્ ॥ ૧૩.૧૧૦॥

દૃષ્ટ્વા જગતિ જન્તૂનાં કાલે કાલે ભવાભવમ્ ।
ફલાનામિવ કાલજ્ઞઃ કોઽનુશોચતિ તત્ત્વધીઃ ॥ ૧૩.૧૧૧॥

જનકેન પુરા પૃષ્ટો જગાદ બ્રાહ્મણોઽશ્મકઃ ।
સ્વભાવનશ્વરાન્ભાવાન્ન શોચન્તિ વિવેકિનઃ ॥ ૧૩.૧૧૨॥

ન કશ્ચિદ્દૃશ્યતેઽત્યેતું સ્થાવરેષુ ચરેષુ ચ ।
શક્તો હ્યાયુષિ મર્યાદાં યઃ કાલવિહિતાં ભવેત્ ॥ ૧૩.૧૧૩॥

ધનમાયુઃ શરીરં ચ જાતિસ્તરુણતા તથા ।
ભજન્તે કાલવૈચિત્ર્યાન્નાનારૂપવિપર્યયમ્ ॥ ૧૩.૧૧૪॥

ઉચ્ચા નીચત્વમાયાન્તિ વિશીર્યન્તે ચ સંહતાઃ ।
ભવન્તિ કિલ કાલેન નિમ્નાન્યુચ્છ્રાયવન્તિ ચ ॥ ૧૩.૧૧૫॥

હીનવંશાઃ કુલીનત્વં ધનિનશ્ચ દરિદ્રતામ્ ।
યાન્તિ મૂર્ખાશ્ચ વૈદુષ્યં દૌર્ભાગ્યં સુભગાસ્તથા ॥ ૧૩.૧૧૬॥

સ્વલ્પાયુષશ્ચ રાજાનો દરિદ્રાશ્ચ શતાયુષઃ ।
જરાભગ્નાશ્ચ દૃશ્યન્તે રસાયનવિચક્ષણાઃ ॥ ૧૩.૧૧૭॥

ધનિનો વ્યાધિસન્તપ્તા દરિદ્રાશ્ચ નિરામયાઃ ।
આયુર્વેદવિદો યાન્તિ તરુણા એવ પઞ્ચતામ્ ॥ ૧૩.૧૧૮॥

મૂર્ખાઃ સદાચારરતાઃ પણ્ડિતા ધર્મવર્જિતાઃ ।
ભવન્તિ કાલવિહતૈસ્તૈસ્તૈઃ કિલ વિપર્યયૈઃ ॥ ૧૩.૧૧૯॥

અપિ ત્રૈલોક્યકર્તારસ્ચતુર્મુખમુખાઃ સુરાઃ ।
ન હિ કાલકટાક્ષેણ લક્ષિતં રક્ષિતું ક્ષમાઃ ॥ ૧૩.૧૨૦॥

શ્રીમતાં હીનવિત્તાનાં ધીમતાં જડચેતસામ્ ।
તુલ્યં નિરનુરક્તો હિ કાલપણ્યગૃહે ક્રયઃ ॥ ૧૩.૧૨૧॥

કાલાનિલવિલોલાનાં દેહિનાં ભવકાનને ।
દ્રુમાણામિવ જાયન્તે મિથો નિત્યં ગમાગમાઃ ॥ ૧૩.૧૨૨॥

અકસ્માત્સઙ્ગતો નામ યદ્યકસ્માદ્વિનશ્યન્તિ ।
શોકઃ કિં તત્ર જન્તૂનાં સતતં હિ ગતાગતમ્ ॥ ૧૩.૧૨૩॥

ન વિયોગેષુ સન્તાપઃ કાર્યઃ કિલ વિવેકિભિઃ ।
અભાવાનુભવે ભાવા ભવે હિ ક્ષણભઙ્ગિનઃ ॥ ૧૩.૧૨૪॥

અશ્મકેનેતિ કથિતં કથયિત્વા મુનીશ્વરઃ ।
વિરરામ સમાલોક્ય ગાઢશોક યુધિષ્ઠિરમ્ ॥ ૧૩.૧૨૫॥

ઇતિ ભારતમઞ્જર્યાં ક્ષેમેન્દ્રવિરચિતા અશ્મકગીતા સમાપ્તા ।

*ashmakagItA from Bharatamanjari of Kshemendra*

pdf was typeset on October 15, 2022

Please send corrections to *sanskrit@cheerful.com*